# ॥ वाल्मीकि रामायण॥

## १ बालकाण्ड

### अध्याय ४

प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः ।
चकार चरितं कृत्स्नं विचित्रपदमात्मवान् ॥ १॥

कृत्वा तु तन्महाप्राज्ञः सभविष्यं सहोत्तरम् ।
चिन्तयामास को न्वेतत्प्रयुञ्जीयादिति प्रभुः ॥ २॥

तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः ।
अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ ॥ ३॥

कुशीलवौ तु धर्मज्ञौ राजपुत्रौ यशस्विनौ ।
भ्रातरौ स्वरसम्पन्नौ ददर्शाश्रमवासिनौ ॥ ४॥

स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।
वेदोपबृह्मणार्थाय तावग्राहयत प्रभुः ॥ ५॥

काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् ।
पौलस्त्य वधमित्येव चकार चरितव्रतः ॥ ६॥

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् ।
जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितम् ॥ ७॥

हास्यशृङ्गारकारुण्यरौद्रवीरभयानकैः ।
बीभत्सादिरसैर्युक्तं काव्यमेतदगायताम् ॥ ८॥

तौ तु गान्धर्वतत्त्वज्ञौ स्थान मूर्च्छन कोविदौ ।
भ्रातरौ स्वरसम्पन्नौ गन्धर्वाविव रूपिणौ ॥ ९॥

रूपलक्षणसम्पन्नौ मधुरस्वरभाषिणौ ।
बिम्बादिवोद्धृतौ बिम्बौ रामदेहात्तथापरौ ॥ १०॥

तौ राजपुत्रौ कार्त्स्न्येन धर्म्यमाख्यानमुत्तमम् ।
वाचो विधेयं तत्सर्वं कृत्वा काव्यमनिन्दितौ ॥ ११॥

ऋषीणां च द्विजातीनां साधूनां च समागमे ।
यथोपदेशं तत्त्वज्ञौ जगतुस्तौ समाहितौ ।
महात्मानौ महाभागौ सर्वलक्षणलक्षितौ ॥ १२॥

तौ कदा चित्समेतानामृषीणां भावितात्मनाम् ।
आसीनानां समीपस्थाविदं काव्यमगायताम् ॥ १३॥

तच्छ्रुत्वा मुनयः सर्वे बाष्पपर्याकुलेक्षणाः ।
साधु साध्वित्य्तावूचतुः परं विस्मयमागताः ॥ १४॥

ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः ।
प्रशशंसुः प्रशस्तव्यौ गायमानौ कुशीलवौ ॥ १५॥

अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः ।
चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितम् ॥ १६॥

प्रविश्य तावुभौ सुष्ठु तदा भावमगायताम् ।
सहितौ मधुरं रक्तं सम्पन्नं स्वरसम्पदा ॥ १७॥

एवं प्रशस्यमानौ तौ तपःश्लाघ्यैर्महर्षिभिः ।
संरक्ततरमत्यर्थं मधुरं तावगायताम् ॥ १८॥

प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः कलशं ददौ ।
प्रसन्नो वल्कलं कश्चिद्ददौ ताभ्यां महायशाः ॥ १९॥

आश्चर्यमिदमाख्यानं मुनिना सम्प्रकीर्तितम् ।
परं कवीनामाधारं समाप्तं च यथाक्रमम् ॥ २०॥

प्रशस्यमानौ सर्वत्र कदा चित्तत्र गायकौ ।
रथ्यासु राजमार्गेषु ददर्श भरताग्रजः ॥ २१॥

स्ववेश्म चानीय ततो भ्रातरौ सकुशीलवौ ।
पूजयामास पूजार्हौ रामः शत्रुनिबर्हणः ॥ २२॥

आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ।
उपोपविष्टैः सचिवैर्भ्रातृभिश्च परन्तपः ॥ २३॥

दृष्ट्वा तु रूपसम्पन्नौ तावुभौ वीणिनौ ततः ।
उवाच लक्ष्मणं रामः शत्रुघ्नं भरतं तथा ॥ २४॥

श्रूयतामिदमाख्यानमनयोर्देववर्चसोः ।
विचित्रार्थपदं सम्यग्गायतोर्मधुरस्वरम् ॥ २५॥

इमौ मुनी पार्थिवलक्ष्मणान्वितौ

कुशीलवौ चैव महातपस्विनौ ।
ममापि तद्भूतिकरं प्रचक्षते
महानुभावं चरितं निबोधत ॥ २६ ॥

ततस्तु तौ रामवचः प्रचोदिताव्
अगायतां मार्गविधानसम्पदा ।
स चापि रामः परिषद्गतः शनैर्
बुभूषयासक्तमना बभूव ॥ २७ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com